A

# SAMAGRA SHIKSHA, KERALA

911

## Second Terminal Evaluation - 2022-23

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- IX**

**Time - 1 ½ Hours** **Total Score - 40**

निर्देशाः -

- १५ निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** **4x1=4**

क) **माकन्दमञ्जरी** नाम कवितां संस्कृतभाषया कः अनूदितवान्?

(वैलोप्पिल्लि श्रीधरमेनोन्, हरिप्रसाद् कटम्पूर्, कुमारनाशान्, पाला नारायणन् नायर्)

ख) कूटियाट्टे उपयुज्यमानं वाद्योपकरणं किम् ?

( चेण्टा, कुषित्तालम्, वीणा, तम्बुरु )

ग) अभिनयः कति विधः?

(चतुर्विधः, पञ्चविधः , सप्तविधः, अष्टविधः )

घ) कः गणे न अन्तर्भवति ?

(वर्धमानकः, चारुदत्तः, मैत्रेयः, दुर्योधनः)

ङ) **नासौ वसन्तसेना, असौ वसन्तसेनः।** कस्य वचनमिदम्?

(आर्यकस्य, चारुदत्तस्य, वर्धमानकस्य, मैत्रेयस्य)

**2. उदाहरणानुसारं पट्टिकां पूरयत।** **4x1=4**

| | कर्ता | कृतिः | विभागः |
|---|---|---|---|
| उदा - | **चाणक्यः** | **चाणक्यनीतिः** | **सुभाषितम् ।** |
| | वैलोप्पिल्लि श्रीधरमोनोन् | ................ | कविता। |
| | ................ | मृच्छकटिकम् | प्रकरणम्। |
| | एस्.के पोट्टक्काट् | सिंहभूमिः | ................। |
| | ................ | हितोपदेशः | कथा। |

3. उदाहरणानुसारं लिखत। 1x1=1

उदा - पुत्रोऽक्षिपत् - पुत्रः + अक्षिपत् ।

क) विवर्णोऽभवत् - ............. + ..........।

4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

क) मैत्रेय ! अवतारय वसन्तसेनाम्।

5. उदाहरणानुसारं लिखत। 1x1=1

उदा - मुखाम्भोजम् - मुखम् एव अम्भोजम्।

क) चरणपङ्कजम् - ..........................।

6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत । 4x2=8

6. उदाहरणानुसारं 'यदा-तदा' उपयुज्य वाक्यं परिवर्तयत ।

उदाः - अङ्कणस्थितात् आम्रात् फलं च्युतम्। मातुः नेत्राभ्याम् अश्रूणि अपतन्।

यदा अङ्कणस्थितात् आम्रात् फलं च्युतं तदा मातुः नेत्राभ्याम् अश्रूणि अपतन्।

क) आर्यकः यानात् अवतर्तुं यतते । चारुदत्तः तं निवारयति।

7. ' बालकाः दीर्घदर्शिनः भवन्ति ' इति आशययुक्तं कविताभागं चित्वा लिखत ।

क) भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः।
दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।

ख) अमरप्रियोऽपि स ज्ञातिषु विमुखस्सन्।
सन्ततं क्रीडालोलो विहरत्यस्मिन् काले ।।

8. अधोदत्तं वाक्यं पठित्वा ल्यबन्त - तुमुन्नन्तपदे चित्वा लिखत।

बालाः पात्रं स्वीकृत्य पुष्पाणि समाहर्तुम् अगच्छन्।

9. उदाहरणानुसारं वाक्यं परिवर्तयत ।

उदाः - यानस्य बहिः पादौ दृश्येते।

यानात् बहिः पादौ दृश्येते।

क) विद्यालयस्य बहिः कोलाहलः श्रूयते ।

10. समानार्थकपदानि चित्वा पट्टिकां पूरयत ।

| | पदम् | समानार्थकपदम् |
|---|---|---|
| उदा- | निगडम् | शृङ्खला |
| | | |
| | | |

मधुपः , शृङ्खला,
अर्भकः, निगडम्,
शिशुः, भृङ्गः

11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

11. **श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

माकन्दं समाहर्तुं नागमिष्यामीत्युक्त्वा
स्तवकं पुत्रोऽक्षिपत् सुन्दरं भूमौ शुचा ।।

क) पुत्रः किं समाहर्तुं नागमिष्यामि इति उक्तवान् ?

ख) पुत्रः दुःखेन स्तवकं कुत्र अक्षिपत् ?

ग) अस्मात् श्लोकात् एकं क्रियापदं चित्वा लिखत।

घ) **'मनोहरम्'** इत्यर्थकं पदं चित्वा लिखत।

12. **श्लोकं पठित्वा सूचनाः उपयुज्य आस्वादनटिप्पणीं लिखत।**

मातुराक्षेपं श्रुत्वा पुत्रस्य मुखाम्भोजं
निष्कलं तप्ताश्रुभिर्वैवर्ण्यमाप्तं क्षणात्।।

**सूचनाः** - वैलोप्पिल्लि - माम्पषम् - माकन्दमञ्जरी - आम्रफलम् - पुत्रः - स्तवकं- मातुराक्षेपं - मुखाम्भोजम् - प्रपेदे ।

13. **खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

तमिल्नाटुराज्ये रामनाथपुरं जिल्लायां वर्तमानं प्रसिद्धं नगरं भवति रामेश्वरम् । पाम्पन् द्वीपमध्ये नगरमिदं वर्तते । दर्शनीयानि बहूनि स्थानानि अत्र सन्ति। पाम्पन् सेतुः , रामनाथमन्दिरम्, गन्धमादनपर्वतम्, आञ्जनेयक्षेत्रम्, धनुष्कोटिः, सीतातीर्थम् इत्यादीनि तेषु कानिचन। रामस्य ईश्वरः (शिवः) तिष्ठति इति व्युत्पत्या 'रामेश्वरम्' इति नाम सञ्जातम्।

क) रामेश्वरम् कस्मिन् द्वीपे वर्तते ?

ख) रामेश्वरम् इति पदस्य उद्भवः कथम् ?

ग) रामेश्वरे दर्शनयोग्यानि स्थानानि कानि?

घ) रेखाङ्कितपदस्य पदच्छेदं लिखत।

14. **प्रादेशिकभाषया विवर्तयत।** 1x5=5

अधुनातनकाले सर्वत्र उन्मादकवस्तूनाम् उपयोगमधिकृत्य वार्ताः प्रसरन्ति। उन्मादकवस्तूनि जनानां बुद्धिम् आरोग्यं च नाशयन्ति। छात्राणामपि मध्ये विविधानाम् उन्मादकवस्तूनाम् उपयोगः दृश्यते। इदानीं सर्वकारः तेषां निर्मार्जनाय अनेकाः पद्धतीः प्रचालयति। तासु प्रमुखा भवति 'योद्धाव्' इति पद्धतिः।

15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. सूचनाः उपयुज्य दृश्यकाव्यमधिकृत्य टिप्पणीं लिखत।

सूचनाः - संस्कृतसाहित्यं - अतिविशालं - दृश्यं श्रव्यं - दशरूपकाणि- अश्वघोषः - कालिदासः - मृच्छकटिकम्।

16. खण्डिकां पठित्वा सम्भाषणांशान् पूरयत।

कूटियाट्टम् संस्कृतदृश्यकलारूपं भवति। वाद्य-सङ्गीत-नृत्त - अभिनयानां समन्वयः एव अस्य विशेषः। आङ्गिक-सात्विक- वाचिक-आहार्यरूपाः चतुर्विधाभिनयाः अस्मिन् प्रयुज्यन्ते। मिष़ाव् , इटक्का, कुष़ित्तालम्, शङ्खः इत्यादीनि वाद्योपकरणानि च उपयुज्यन्ते। युनेस्कोसंस्थया विश्वपैतृककलारूपेण तत् समादृतम्। केरलकलामण्डले कूटियाट्टपठनाय अवसरः वर्तते।

छात्रः - नमस्ते आचार्य।
आचार्यः - ..................। आगमनोद्देश्यं किम् ?
छात्रः - कूटियाट्टकलारूपम् अधिकृत्य अधिकं ज्ञातुम् अभिलषामि।
आचार्यः - .................................. समन्वयमेव कूटियाट्टम् ।
छात्रः - चतुर्विधाभिनयाः सन्ति इति श्रूयते। तानि कानि ?
आचार्यः - ..........................................................।
छात्रः - केरले कूटियाट्टपठनाय अवसरः अस्ति वा?
आचार्यः - अस्ति। ................................. अवसरः अस्ति।
छात्रः - धन्यवादः ।

17. सूचनाः उपयुज्य तपोवनस्वामिनः जीवनचरितं लिखत।

सूचनाः -
नाम - सुब्रह्मण्यः ।
जन्म - 1859 पालक्काट् कुष़ल्मन्दम्।
पितरौ - अच्युतन् नायर्, कुञ्ञम्मा।
प्रशस्तिः - तपोवनस्वामी।
गुरवः - चट्टम्पिस्वामी, शिवानन्दयोगी, शान्त्यानन्दसरस्वती।
कृतयः - हिमगिरिविहारम्, कैलासयात्रा (यात्राविवरणम्)।
समाधिः - 1957 जनुवरि 16

*** *** *** ***